# संस्कृत-वार्ता:

दिनाङ्कः-06.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- बिहार-विधानसभायाः निर्वाचनं अस्मिन् वर्षे द्वयोः चरणयोः क्रमशः नवम्बरमासस्य षड्दिनाङ्के एकादशदिनाङ्के च भविष्यति सहैव मतगणना नवंबरमासस्य चतुर्दशदिनाङ्के भविष्यति ।
- दुर्गा-पूजायां मूर्ति-विसर्जनयात्रावधौ जातानां हिंस्रघटनानांम् अनन्तरं , ओडिशायाः कटकनगरे श्वः प्रातः यावत् निषेधाज्ञा प्रवर्तिता अस्ति ।
- अमेरिकायाः वैज्ञानिकौ मैरी ई. ब्रुनको , फ्रेड-रामस्डेलः च , जापानस्य शिमोन-साकागुची इत्यनेन सह , परिधीय-प्रतिरक्षा-सहिष्णुता इत्यस्मिन् विषये तेषाम् अभूतपूर्व-अन्वेषम् अधिकृत्य अस्य वर्षस्य फिजियोलॉजी-मेडिसिन इत्यस्य विषयस्य नोबेल-पुरस्कारं प्राप्तवन्तौ ।
- भारतेन विश्व-पैरा-एथलेटिक्स-चैंपियनशिप इत्यस्मिन् क्रीडाद्वन्द्वे षट् स्वर्णपदकान् नव-रजतपदकान्,सप्त-कांस्यपदकान् समेत्य द्वाविंशति-पदकैः सह स्वकीयम् अभियानं सुसम्पन्नम् ।

------------------------------------------------------------

<u>बिहार- निर्वाचन-आयोग</u>

बिहार-विधानसभायाः निर्वाचनं अस्मिन् वर्षे द्वयोः चरणयोः क्रमशः नवम्बरमासस्य षड्दिनाङ्के एकादशदिनाङ्के च भविष्यति सहैव मतगणना नवंबरमासस्य चतुर्दशदिनाङ्के भविष्यति । निर्वाचनायोगेन अद्य त्रिचत्वारिंशदुत्तर-द्विशतं सदस्यभूताय बिहार-विधानसभा-निर्वाचनाय मतदान-कार्यक्रमस्य घोषणा कृता अस्ति। निर्वाचन-कार्यक्रमस्य घोषणया सह एव बिहारे आदर्शाचार-संहिता प्रख्यापिता अस्ति ।अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन्

मुख्य-निर्वाचनायुक्तः ज्ञानेशकुमार अकथयत् यत् राज्ये त्रिचत्वारिंशदुत्तर-सप्तकोटि-संख्याकेभ्यः मतदातृभ्यः द्वादशोत्तर-सप्तशताधिक-नवतिसहस्र-संख्याकानि मतदानकेन्द्राणि निर्मितानि भविष्यन्ति।

सः प्रोक्तवान् यत् प्रथमचरणस्य मतदानाय अधिसूचना अस्य मासस्य दशमदिनाङ्के प्रकाशिता भविष्यति सहैव प्रत्याशिनः सप्तदशदिनाङ्कं यावत् नामाङ्कनं कर्तुं शक्ष्यन्ति ।द्वितीय-चरणस्य निर्वाचनाय अधिसूचना अस्य मासस्य त्रयोदश-दिनाङ्के प्रकाशिता भविष्यति विंशति-दिनाङ्कं यावत् च प्रत्याशिनः नामाङ्कनं विधातुं शक्नुवन्ति । मुख्य-निर्वाचनायुक्तः अकथयत् यत् प्रथमवारं प्रत्येकस्मिन् निर्वाचनक्षेत्रे एकः सामान्यपर्यवेक्षकः प्रयोजयिष्यते यः आयोगस्य सञ्जयो भूत्वा कार्यं करिष्यति । श्री-कुमारः अकथयत् यत् निर्वाचनप्रक्रियायाः गहननिरीक्षणाय सर्वेषु मतदानकेन्द्रेषु वेबकास्टिंग इति एतत् आयोजयिष्यते। सः पुनः प्रोक्तवान् यत् जनपदाधिकारिणः आरक्ष्याधीक्षकाः च कीदृश्यः अपि हिंसाघटनाः न सोढुं निर्दिष्टाः सन्ति । सः इदमपि अकथय़त् यत् आयोगः राज्ये पर्याप्त-केन्द्रीय-सशस्त्र-आरक्षि-बलानां सन्धानं करिष्यति सहैव मादकपदार्थानां अनैतिकधनस्य च व्रजनाव्रजनं प्रति निरीक्षणं करिष्यति ।

---

**ओडिशा-निषेधाज्ञा**

दुर्गा-पूजायां मूर्ति-विसर्जन-यात्रावधौ जातानां हिंस्रघटनानांम् अनन्तरं , ओडिशायाः कटकनगरे श्वः प्रातः यावत् निषेधाज्ञा प्रवर्तिता अस्ति । विधि-व्यवस्थां सुचारुतया समारब्धुं इंटरनेट इति अन्तर्जालसेवाः अपि कठोरप्रतिबन्धैः सह पिनद्धाः सन्ति। वार्ताहरैः सह वार्तां कुर्वन् , अतिरिक्त-आरक्षि-आयुक्तः नरसिंह-भोला इत्यसौ अकथयत् यत् चिकित्सालय-आपण-ईधनादयः आपातकालीनसेवाः अतिरिच्य निषेधाज्ञायाः अवधौ अन्यानि सर्वाण्यपि व्यावसायिक-प्रतिष्ठानानि पिनद्धानि भविष्यन्ति। अवधेयं यत् एषा हिंस्रघटना तदा समारब्धा यदा गत-शुक्रवासरस्य रात्रौ केचन स्थानीयजनाः विसर्जनस्य यात्रावधौ उच्चसंगीतं विरुध्य आपत्तिं प्रकटितवन्तः। ओडिशायाः मुख्यमंत्री मोहन-चरण-माझी कटकनगरस्य जनान् शांत्यै सद्भावनायै च सम्प्रार्थितवान् ।

---

<u>पटना-मेट्रो-रेल:</u>

बिहारस्य मुख्यमंत्री नीतीशकुमारः अद्य पटना-मेट्रो-रेल-सेवायाः प्रथम-चरणस्य उद्घाटनं कृतवान्। षड्-वर्षाणां दीर्घतमस्य अवधेः अनन्तरं , पटनायां बहुप्रतीक्षिता मेट्रो-रेल-सेवा अन्ततः सकारात्मकरूपेण समारब्धा अस्ति। अवधेयं यत् अस्याः परियोजनाः निर्माणकार्यं फरवरीमासस्य नवदशोत्तर-द्विसहस्रतमाब्दे प्रधानमन्त्रिणा नरेंद्रमोदिना समारब्धम्। राज्यस्य प्रथम- मेट्रो-रेल-सेवायाः शुभारम्भेण सह एव पटनावासिनां प्रतीक्षासमयः अवसानमगच्छत्। पटना-मेट्रो-रेल-सेवायाः अन्तर्गतं ,अद्य अन्तराज्यीय-बस-टर्मिनल भूतनाथॉ-स्टेशन इत्यनयोः मध्ये प्रायोरिटी-कॉरिडोर इत्यस्य एलिवेटेड-सेक्शन इत्यत्र प्रथमा मैट्रोरेलसेवा समारब्धा अस्ति। अन्येषु रेल-स्थानकेषु रेलसेवाः आगामिषु चरणेषु समारप्स्यते सहैव कार्यं द्रुतगत्या अग्रे वर्धते।

---

<u>नोबेल-पुरस्कार-चिकित्सा:</u>

अमेरिकायाः वैज्ञानिकौ मैरी ई. ब्रुनको , फ्रेड-रामस्डेलः च , जापानस्य शिमोन-साकागुची इत्यनेन सह , परिधीय-प्रतिरक्षा-सहिष्णुता इत्यस्मिन् विषये तेषाम् अभूतपूर्व-अन्वेषम् अधिकृत्य अस्य वर्षस्य फिजियोलॉजी-मेडिसिन इत्यस्य विषयस्य नोबेल-पुरस्कारं प्राप्तवन्तौ । प्रतिरक्षाप्रणाली अस्माकं शरीरं विरुध्य आक्रमणं कुर्वद्भ्यः सहस्राधिकेभ्यः सूक्ष्मजीवेभ्यः कथं अस्मान् रक्षति इति विषयमधिकृत्य वैज्ञानिकेभ्यः एषः पुरस्कारः प्रदत्तः अस्ति । नोबेल-समित्या अद्य, स्वीडनस्य स्टॉकहोम इत्यत्र एकस्मिन् समारोहे घोषिताः त्रयोपि वैज्ञानिकाःनियामक टी कोशिकानां अभिज्ञानं कर्तुं सम्मानिताः। अनेन अन्वेषणेन स्व-प्रतिरक्षित-रोगेषु ,कर्करोगे अंगप्रत्यारोपणे च नवीनोपचाराणां मार्गं प्रशस्तं कृतम् अस्ति । एकादश-मिलियन्-स्वीडिश-क्रोनर-मितस्य अयं पुरस्कारः त्रिषु मध्ये समानरूपेण वितरिष्यते।

---

<u>आईएमडी:</u>

ऋतु-विज्ञान-विभागेन अद्य जम्मू-कश्मीर, उत्तराखंड, पंजाब, हरियाणा ,दिल्ली-एनसीआर चेत्यादीनां क्षेत्राणां कुत्रचित् स्थलेषु भीषणतोः अतिभीषणवृष्टेः अनुमानं प्रकटितम् अस्ति। नव-दिल्ल्या तन्निकटवर्तिषु क्षेत्रेषु च अद्य ओलावृष्टिः इत्यस्य अपि संभावना अस्ति। आकाशवाण्या सह जाते विशिष्टे सम्वादे , आईएमडी इत्यस्य वरिष्ठः वैज्ञानिकः डॉ. आर. के. जेनामणि इत्यसौ अकथयत् यत् श्वः समारभ्य राष्ट्रीय-राजधानी-क्षेत्रे वृष्टेः गतिविधौ न्यूनता भविष्यति

---

<u>जयपुरचिकित्सालयः-अग्निकांडम्</u>

जयपुरस्य सवाई-मान-सिंह-चिकित्सालये अग्निकाण्डस्य घटनायाः अन्वीक्षणाय चिकित्सा-शिक्षायुक्तस्य अध्यक्षतायां षट्-सदस्यानां उच्च-स्तरीय-समितेः ग्रन्थनं कृतमस्ति। ध्यानास्पदं वर्तते यत् अस्यां घटनायां षट्-जनानां मृत्युः जाता आसीत् । ह्यः रात्रौ द्वितीये भवनस्थे ट्रॉमा-आईसीयू इत्यत्र अग्निः समुत्थापितः यत्र एकादश-रुग्णाः चिकित्सारताः आसन्। ट्रॉमा-सेंटर इत्यस्य प्रभारी डॉ.अनुराग-धाकड़ः अकथयत् यत् शॉर्ट-सर्किट इत्यनेन कारणेन अग्निकाण्डम् अभवत् तीव्रगत्या च अग्निप्रसरणेन विषाक्तवातिः निर्गता सर्वत्र प्रसरिता च।

प्रधानमंत्रिणा नरेंद्रमोदिना अस्यां दुर्घटनायां जातेषु मृत्युषु दुःखः प्रकटितः अस्ति । एकस्मिन् सामाजिक-संदेशे , श्रीमोदी अकथयत् यत् अनया घटनया तेन अत्यन्तं दुःखम् अनुभूतम् अस्ति सहैव मृतकानां परिवारेभ्यः अपि प्रधानमन्त्रिणा स्वकीया सम्वेदना प्रकटिता अस्ति। राजस्थानस्य मुख्यमंत्री भजन-लाल-शर्मा व्रणितेभ्यः उचितं चिकित्सावौविध्यं प्रदातुम् आश्वासनं प्रायच्छत्। सवाई-मान-सिंह-चिकित्सालयस्य यात्रां विधाय अनन्तरं, मुख्यमंत्री एक्स इत्यत्र एकं संदेशं प्रकाशयन् अकथयत् यत् स्थितिः निरन्तरं अवलोक्यते ।

---

## विश्व-पैरा-चैंपियनशिपक्रीडा

भारतेन नवदिल्ल्याम् आयोजिते विश्व-पैरा-एथलेटिक्स-चैंपियनशिप इत्यस्मिन् क्रीडाद्वन्द्वे द्वाविंशति-पदकैः सह स्वकीयम् अभियानं सुसम्पन्नम् येषु षट् स्वर्णपदकानि नव-रजतपदकानि,सप्त-कांस्यपदकनि च सम्मिलतानि सन्ति। जवाहरलाल-नेहरू-स्टेडियम इत्यत्र अंतिम-दिवसे सप्त-भारतीय-क्रीडकाः भागम् अभजन्। सिमरन-शर्मा इत्यनया द्विशतं मीटरमितस्य टी-द्वादश इत्यस्मिन् क्रीडावर्गे रजतपदकं , प्रीतिपालः इत्यनया च शतमीटरमितस्य टी-पञ्चत्रिंशत् इत्यस्मिन् क्रीडावर्गे रजतपदकं विजितम्। द्वयोरेव अस्य संस्करणस्य द्वितीयं पदकम अस्ति। पैरालंपिक-क्रीडिका नवदीपः इत्यनेन करभाल-प्रक्षेपणस्य F-एकचत्वारिंशत् इत्यस्मिन् वर्गे रजतपदकं . संदीपः इत्यनेन च द्विशतमीटरमितस्य टी-चतुश्चत्वारिंशत्वर्गे कांस्यपदकं विजतम् अस्ति।

।। इति वार्ता ।।